 ISSN 976-8645

# नैवेद्यम्



डॉ. सदानन्दझा[1]

**कालीनः कुशलं करोतु सततं तारा तनोतु श्रियम्**

**दीर्घायुर्भुवनेश्वरी वितनुतां विघ्नं हतात् षोडशी।**

**भैरव्या सहिता सदारिपुगुणा साछिन्नमस्ताहतान्-**

**मातङ्गीबगलामुखी च कमला धूमावती पान्तु।**

प्राच्यविद्या-गम्भीर विचार-सार समाकृष्टचेतसां सुरसरस्वती प्रचार-प्रसारबद्धपरिकराणां प्रस्तुतपत्रिकायाः प्रचारविधौ समुत्साहवतां विदितयशसां विदुषां पाठकानां पुरस्तात् विश्वस्य प्रथमान्तर्जालीयसंस्कृतत्रैमासिकपत्रिकाया जाह्नव्या पञ्चदशाङ्कं समुपस्थापयन् अमन्दमानन्दमनुविन्दामि।

स्वतन्त्रभारतेऽधुना भारतीयविद्यायागंभीरविषयाणां सुपरिचयः राष्ट्रगौरवसम्बर्द्धने सहायकः स्यादिति नापरोक्षं विपश्चिताम्। प्रज्ञावन्तो वैदेशिका विज्ञातारोऽपि भारतीयवाङ्मयस्य गाम्भीर्यं च मुक्तकण्ठं प्रशंसन्।

विदुषां शेवधिभूताया अस्याः सुरभाषायाः प्रचारकार्ये सकलभारतीयवैदेशिकविदुषां सहाय्यमवाप्य नितरां सन्तोषमनुभवामि। प्रस्तुतेऽस्मिन्नङ्के-विविधशास्त्रमर्मविदां विपश्चितां विभिन्नप्रान्तेभ्यः वैदुष्यपूर्णशोधनिबन्धाः समावेशिताः सन्ति। यथा शास्त्रकाव्यानां सामान्यपरिचयः, वेदशास्त्रे श्रीहर्षस्य पाण्डित्यम्', व्याकरणं तत्सम्बद्धंभाषाविज्ञानञ्चेत्यादयः शोधनिबन्धाः विदुषांपाठकानां मनोहरिष्यन्तीति दृढं प्रत्येमि।

संस्कृतभाषायाः तत्रनिहितविचाराणाञ्च परितः प्रसारः प्रस्तुतपत्रिकायाः मूलमुद्देश्यमस्ति। आशाऽसे यद्येवमेव सारस्वतसेवाव्रतीनां कृपालवोलभ्येत तदा सारस्वतरङ्गमञ्चे पत्रिकेमनारतण् नरीनर्तिष्यते इति।

विगतसंयुक्ताङ्कस्य लोकार्पणं कर्णाटकस्थ-बेङ्गलुरुनगरे तत्र भवद्भिर्जगद्गुरु-सुगुणेन्द्रतीर्थपादैः नैकविधकार्यक्रमव्यस्तैरपि सानुग्रहमकारि इति ते सविनयं विनतसिरशा समभिनन्द्यते।

[1] पत्रिकायाः मुख्यसम्पादकः।

अत्र स्वामिपादानां सम्प्रेषिताशीर्वचनसन्देशसमुल्लेखलोभं संवरीतुमशक्नुताऽधस्तात् प्रस्तूयते- इयं जाह्नवी नाम ज्ञानगङ्गा त्रिपथगेव संस्कृताभिमानिनां श्रुतिषु सततं प्रवहतुतमाम्। उभेऽपिभुक्तिमुक्तिप्रदायिके दुरितध्वंशविधायिके च भवतः।

साधुशब्दानामर्थानाञ्चसम्बन्धः औत्सर्गिकः। गङ्गायाः पापतापशामकत्वशक्तिरपि स्वाभाविकी अन्यसरितां मध्ये त्रिपथगाया महिमेव अन्यभाषाणां मध्ये सुरसरस्वत्यावर्तत इति भगवान् पतञ्जलिः स्फुटमाहस्म-एकः शब्दः सम्यक् ज्ञातः सुप्रयुक्तः स्वर्गे लोके च कामधुग्भवति इति।

प्रत्यक्षमत्र गङ्गाद्वयं प्रवहदृक्पथमायाति विहारतः प्रवहत्यस्मिन् जाह्नवीयुगले समे श्रद्धालवोऽवगाह्य पूतात्मानो भवन्तु, जाह्नवीचेयं विश्वव्यापिनी भूयादितिकामये।

श्रुतध्वनिमनोहरा कलुषहारिणीपावनी
स्मृताप्यतनुतापहृत् समवगाहसौख्यावहा।
निषेव्यपदपंकजा विबुधमान्याऽमला
समस्तजगतीतले प्रवहतादियं जाह्नवी।

विद्वच्चरणचञ्चरीकः

झोपाख्यः सदानन्दः

लखनौरम्, बिहारः
विजयादशमी, २०७०

*****************************************************